# भारतीय-विद्या-भवनम्, मुम्बई - ७

## ( सरल - संस्कृत - परीक्षा - विभागः )

# संस्कृत-कोविदः

## SAMSKRITA KOVIDA

### प्रथमं प्रश्नपत्रम् - First Paper

**( समयः १०.३० तः १२.३० )** **( पूर्णाङ्काः ५० )**

**प्र.१. केचन त्रयः श्लोकाः हिन्द्या/आंग्लभाषया/माध्यमभाषया ससन्दर्भं व्याख्येयाः । ९**

(१) रामं प्रव्राजयारण्ये नववर्षाणि पञ्च च।
भरतः क्रियतां राजा पृथिव्याः पार्थिवर्षभः।।

(२) आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भः आरम्भसदृशोदयः।।

(३) तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा।
पत्नी सुदक्षिणेत्यासीद् अध्वरस्यैव दक्षिणा।।

(४) नूपुराणां च घोषेण काञ्चीनां निनदेन च।
मृदङ्गतलघोषैश्च घोषविद्भिर्विनादितम्।

**प्र.२. केषाञ्चन त्रयाणां प्रश्नानां संस्कृतभाषया उत्तरं देयम् । ६**

(१) हरिश्चन्द्रः स्वकीयं समग्रं राज्यं कं दत्वा प्रतिज्ञां पूरयामास? (२) रोहिताश्वस्य मृत्युः केन कारणेन अभूत्? (३) सलिले पतितैः पाषाणेन के शीर्णाङ्गाः अभवन्? (४) मन्थरा कैकयीं किं स्मारयामास?

**प्र.३. अधोलिखितवाक्येषु पञ्चानां हिन्द्या/आंग्लभाषया/माध्यमभाषया अनुवादः कार्यः। ५**

(१) नेतारः ग्रामोन्नत्यै अहर्निशं चिन्तयन्ति। (२) तस्मिन् निर्जने स्थाने कोऽपि क्रोशति। (३) बालकाः मोदकान् प्राप्य मोदन्ते। (४) वृक्षस्य पर्णानि एजन्ते। (५) वाराणसीयाः शालाः प्रसिद्धाः सन्ति। (६) राजानः विविधोपहारैः विदुषां सम्मानं कुर्वन्ति स्म।

**प्र.४. (क) त्रयाणां समासानां विग्रहवाक्यानि विलिख्य समासनामानि लिखत ।** ३

(१) राजपुरुषाः। (२) वसुधाधिपः। (३) अनातुरः। (४) वृषस्कन्धः ।

**(ख) त्रयाणां सन्धिविच्छेदं कुरुत ।** ३

(१) एषोऽपि। (२) सुहृदश्च।(३) दशाननः ।(४) द्वितीयोऽपि।

**(ग) त्रयाणां लिङ्गवचनविभक्तीः लिखत ।** ३

(१) हरये। (२) भवनानि। (३) सुतसङ्गमः ।(४) मित्राणि।

**(घ) ''भू-धातोः'' अथवा ''नन्द्-धातोः'' लिङ्-लकारे सर्वाणि रूपाणि लिखत।** ३

**(ङ) त्रयाणां धातुरूपाणां लकार-पुरुष-वचनानि लिखत ।** ३

(१) अर्चिष्यामि ।(२) अभवत्।(३) वन्देत।(४) वप्स्यति।

**प्र.५. निम्नलिखितवाक्येषु पञ्चानां संस्कृतभाषया अनुवादं कुरुत ।** ५

(१) आज भी ऋषि लोग तप करते हैं। (२) दानी लोग संसार में प्रसिद्ध होते हैं। (३) स्वामी विवेकानन्द विदेश जाकर प्रसिद्ध हुए। (४) सज्जन गर्व नहीं करते। (५) बच्चे पाठशालाओं में पढ़ते हैं (६) गाँधीजी अपने बर्तन स्वयं माँजते थे।

(1) Sages perform penance today also. (2) Donaters become renowed in this world.(3) Swami Vivekananda became renowned by going abroad. (4) Gentlemen are not proud. (5) The children learn at the school.( 6) Gndhiji used to clean his vessels himself.

**प्र.६. अधोलिखितस्य गद्यखण्डस्य स्वभाषया अनुवादः कार्यः ।** १०

शुकः बुद्धिमान् भवति। अयं श्रुतं गृह्णाति, एषः शिक्षां स्वीकरोति, विनयं धरति, व्यवहारं प्रकटयति, अनुकरणं जानाति, सुभाषितानि पठति, कलं गायति, स्वरं परिचिनोति, विनीतं व्यवहरन्ति, उपदेशं गृह्णाति, परिहासपेशलं च भाषते। विनीतः शुकः रङ्गभूमौ विविधाः कौतूहलक्रियाः प्रदर्शयन्ति। जनाः एनं पञ्जरेषु पालयन्ति पाठयन्ति च संस्कृतम्। एषः शुभदर्शनः खगः। एनं राजानः अपि स्वप्रासादेषु पालयन्ति। पुरा भारते शुकाः पत्रवाहकाः अभूवन्। एभिः एव गुणैः जनाः एतान् वध्नन्ति पञ्जरेषु।

अथवा

रामाभिषेकवृत्तान्तं श्रुत्वा मन्थरा नाम दुष्टा दासी कैकेयीं गत्वा अवादीत्, देवि! जानासि राज्ञा किं चिन्तितमिति? स रामं राजानं कर्तुं वाञ्छति। रामे राजनि तव पुत्रः भरतस्तस्याज्ञाकरो दासो भविष्यति। तव तु न कापि गणना भविष्यति। न कोऽपि तदा तवाज्ञां करिष्यतीति त्वमिमं तिरस्कारं कथं सहिष्यसे? तदिदानीं कमप्युपायं कुरु, येन तव पुत्रो राजा भवेत्। तदा कैकेयी त्वमेव कथयोपायमिति तां पर्यपृच्छत्। सा पुरा दशरथेन प्रतिज्ञातं वरद्वयं तां स्मारयामास।

❑ ❑ ❑

# भारतीय-विद्या-भवनम्, मुम्बई - ७

## ( सरल - संस्कृत - परीक्षा - विभागः )

# संस्कृत-कोविदः

## SAMSKRITA KOVIDA

### द्वितीयं प्रश्नपत्रम् - Second Paper

**( समयः २.०० तः ४.०० )** **( पूर्णाङ्काः ५० )**

**प्र.१. केचन त्रयः श्लोकाः हिन्द्या /आंग्लभाषया /माध्यमभाषया व्याख्येयाः ।** **९**

(१) अम्भोजिनीवनविहारविलासमेव हंसस्य हन्ति नितरां कुपितो विधाता।
नत्वस्य दुग्धजलभेदविधौ प्रसिद्धां वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः।।

(२) वहन्ति वर्षन्ति नदन्ति भान्ति ध्यायन्ति नृत्यन्ति समाश्वसन्ति।
नद्यो घना मत्तगजा वनान्ताः प्रियाविहीनाः शिखिनः प्लवंगाः।।

(३) तस्य वर्षसहस्राणि घोरे तपसि तिष्ठतः।
सुप्रीतो भगवान् ब्रह्मा प्रजानां प्रभुरीश्वरः।।

(४) निर्वाप्य प्रियसन्देशैः सीतां रक्षवधोद्यतः।
स ददाह पुरीं लङ्कां क्षणसोढारिनिग्रहः।।

**प्र.२. अधस्तनस्य गद्यखण्डस्य हिन्द्या/आंग्लभाषया/माध्यमभाषया व्याख्या कार्या ।** **१०**

वृक्षा अपि मनुष्या इव भुक्त्वा पीत्वा च जीवन्ति। मूलानि वृक्षाणां मुखानि पादाः वा भवन्ति। ते पादैः पिबन्ति, अत एव पादपाः कथ्यन्ते। तेषां मूलानि भूमेः रसं गृहीत्वा सर्वेषु अवयवेषु नयन्ति तेन ते प्रवर्धन्ते, पुष्पन्ति, फुल्लन्ति, दधति च फलानि। वृक्षान् अपि वर्षावातशीतातपाः बाधन्ते। तेऽपि सुखानि दुःखानि च अनुभवन्ति। तेष्वपि प्राणाः भवन्ति,अतएव ते प्राणिनः इव जायन्ते वर्धन्ते फुल्लन्ति फलन्ति म्रियन्ते च। ते कदापि खगमृगजलचरनरा इव न चरन्ति इति अचराः कथ्यन्ते। नराः वानरा; खगाः मृगाः घुणाश्चापि तेषां पत्राणि पुष्पाणि फलानि मूलानि वल्कलानि काष्ठानि च खादन्ति। वृक्षाः हि पत्रैः पुष्पैः फलैः छायाभिः मूलैः वल्कलैः दारुभिश्च स्वसंपद्भिः सदैव अभ्यागतानां जीवानां सत्कारं कुर्वन्ति।

**अथवा**

एकस्मिन् महारण्ये कश्चित् सिंहः आसीत्। वनस्य नातिदूरे एव सरः आसीत्। तस्मिन् सरसि एकः मण्डूकः अवात्सीत्। कदाचित् मृगेन्द्रः जलं पातुं सरसस्तस्य तीरमगच्छत्। जले स्थितस्य तस्य भेकस्य रटनं श्रुत्वा सिंहः भयेन अकम्पयत्। सः परितः विलोक्य अवादीत्-अहो! भीषणो ध्वनिः, कुतः अयं समागच्छतीति ज्ञातुं न शक्नोमि। न कोऽपि अत्र दृष्टिपथम् आयाति भयानको जन्तुः, किं पलाय्य प्राणरक्षा कर्तव्या इदानीम्? नहि नहि आपत्सु धैर्यं धरन्ति बुद्धिमन्तः।

**प्र.३. केषाञ्चन त्रयाणां प्रश्नानां संस्कृतभाषया उत्तरं देयम् । ६**

(१) मरालस्य मानसं केन विना न रमते? (२) प्रियंवदा कस्याः सखी आसीत्? (३) कस्याः पतनं धारयितुं पृथिवी असमर्था आसीत्? (४) वसन्तसेना कस्य प्रेयसी आसीत्? (५) उर्वशी कस्य पत्नी आसीत्? (६) अनसूयया प्रियंवदया च तपोवने कस्य आतिथ्यं कृतम्?

**प्र.४. (क) त्रयाणां सन्धिविच्छेदं कुरुत । ३**

(१) इत्यलम् । (२) दिशोऽवलोक्य । (३) इदमवादीत् । (४) सर्वेष्वपि।

**(ख) त्रयाणां समासनामनिर्देशपूर्वकं विग्रहः कार्यः । ३**

(१) वृषस्कन्धः। (२) कृतोपकारः। (३) सुरासुरैः। (४) वर्षावातशीतातपाः।

**(ग) त्रीन् पदान् स्ववाक्येषु योजयत । ३**

(१) रचयति। (२) कृष्णाय। (३) दृष्टिपथम् । (४) आसीत्।

**(घ) ''भक्ष्-धातोः'' अथवा ''दा-धातोः'' लृट्-लकारे (सामान्यभविष्यत्काले) सर्वरूपाणि लिखत । ६**

**प्र.५. निम्नलिखितान् वाक्यान् संस्कृतेऽनुद्यत । १०**

(१) राम किसी को दु:ख नहीं देता है। (२) वह उसे छोड़ देगा। (३) मैं उसके घर जाकर उसे सांत्वना दूँगा। (४) कौन उसे शान्त करेगा? (५) कौन अपनी शक्ति नहीं बढाएगा? (६) घोड़ो को कौन चलाता है? (७) वह क्या तौल रहा है? (८) मैं रुपये गिन रहा हूँ। (९) दशरथ अयोध्या के राजा थे। (१०) वहाँ एक सुन्दर बगीचा है ।

(1) Rama does not hurt anybody. (2) He will abandon him. (3) I will go to his house,and will console him. (4) Who will pacify him? (5) Who will not build up his strength.(6) Who drives the horses? (7) What is he weighing? (8) I am counting rupees. (9) Dasharatha was the king of Ayodhya. (10) There is a beautiful garden .

❑ ❑ ❑

# भारतीय-विद्या-भवनम्, मुम्बई - ७

## ( सरल - संस्कृत - परीक्षा - विभागः )

# संस्कृत-कोविदः

## SAMSKRITA KOVIDA

### तृतीयं प्रश्नपत्रम् - Third Paper

**( समयः १०.३० तः १२.३० )** **( पूर्णाङ्काः ५० )**

**प्र.१. केचन त्रयः श्लोकाः/हिन्द्या /आंग्लभाषया /माध्यमभाषया व्याख्येयाः । ९**

(१) रामेणापि परित्यक्तो लक्ष्मणेन च गर्हितः।
अयशोभाजनं लोके परित्यक्तस्त्वयाप्यहम्।।

(२) मयूरनादिता रम्याः प्रांशवो बहुकन्दराः।
दृश्यन्ते गिरयः सौम्य फुल्लैस्तरुभिरावृता।।

(३) तदाऽऽशुतोषस्य हरस्य तोषणात् सुधांशुरासीत् सितपक्षकान्तिमान्।
स्वयम्भुवो ज्योतिरिदं चिरन्तनम् अतिष्ठिपद् दीप्तहिरण्यमये गृहे।।

(४) लोकेषु सर्वेषु च नास्ति किञ्चिद्यत्ते न नित्यं विदितं भवेत्तत् ।
शंसस्व वायो कुलशालिनीं तां हृता मृता वा पथि वर्तते वा।।

**प्र.२. स्वामिभक्ता पन्नाधात्री इति नाटकस्य संक्षेपेण स्वभाषायां वर्णनं कुरुत। ६**

**प्र.३. निम्नलिखित-गद्यखण्डस्यः हिन्द्या /आंग्लभाषया /माध्यमभाषया अनुवादः कार्यः।१०**

ब्रह्मदेशे भारतेऽपि च पालिता गजाः दारुकार्यालयेषु काष्ठभारान् वहन्ति। पुरा भारते युद्धोपयोगिनो बभुवुः करिणः। हस्तिनः एको गृहीताङ्कुशो महायात्रो भवति। यश्च तमुपनयति खाद्यवस्तूनि पाययति पानीयम्,प्रेरयति च यातुं स्थातुमपि। हस्ती तु तस्यादेशमनुपालयन्ति। वन्या गजास्तु यूथान् सम्पाद्य महारण्येषु निवसन्ति। एकस्मिन् यूथे कश्चिदेको नायको भवति,यः सङ्घं शास्ति। सङ्घे कलभाः करिण्यश्च मध्यतश्चरन्ति,बलिष्ठाः पुङ्गजास्तु सर्वतः। एते सरःसु अवगाहमानाः कमलाकरेषु स्वैरं रमन्ते। गीतानि रोचन्ते गजेभ्यः। गजो यथा बलवाँस्तथैव बुद्धिमान् धीरस्वभावः सगर्वगम्भीरश्च भवति। राजद्वारपुष्टोऽयं दान्तः शान्तश्च सञ्जायते। अयमस्य स्वामिनं हस्तिपकं तस्य कुटुम्बं च सम्यक् परिचिनोति स्निह्यति च तेभ्यः।

**अथवा**

चन्द्रवासरे विद्यालये महती परिषद् उपातिष्ठत्। श्रीमान् प्रधानाध्यापकः सभापतिः स्थानं भूषयाञ्चकार। लेखपरीक्षायां हरिः प्रथमः आसीत्। किन्तु तस्य लेखे बहवः मात्रानुस्वारविसर्गच्युतिदोषाः आसन्। इति स प्रथमं पुरस्कारं नार्हतीति कक्षाध्यापकः परिषदं श्रावयामास। रमेशः प्रथमं पुरस्कारं लेभे। सर्वे छात्राः ''भाग्यं फलति सर्वत्र न विद्या न च पौरुषम्'' इति कथयन्तो रमेशस्य प्रशंसां चक्रिरे। सर्वे ते प्रसन्ना आसन्। किन्तु रमेशस्य मुखे विषादस्य रेखामपश्यन् सुबुद्धयः। जानन्तोऽपि न केऽपि तस्य दोषमुद्घाटयामासुः।

**प्र.४. (क) त्रयाणां विग्रहवाक्यानि विलिख्य समासनामानि लिखत ।** **३**

(१) रोदनध्वनिः। (२) कुशलवौ। (३) दुष्टप्रकृतिः। (४) प्रियंकरः।

**(ख) त्रयाणां सन्धिं विभज्य सन्धिनाम लिखत ।** **३**

(१) गुरुभिरेव। (२) कृत्वाहम्। (३) एकोऽनुगच्छामि। (४) तत्रैव।

**(ग) त्रीणि पदानि स्ववाक्येषु योजयत ।** **३**

(१) पारितोषिकम्। (२) रचयति। (३) लप्स्यसे। (४) स्नुषा।

**(घ) त्रयाणां लकार-पुरुष-वचनानि लिखत ।** **३**

(१) आसीत्। (२) वरिष्यति। (३) वर्तते। (४) सुनोति।

**(ङ) ''लिख्-धातोः'' अथवा ''अद्-धातोः'' लङ्-लकारे (अनद्यतन-भूतकाले) सर्वरूपाणि लिखत।** **३**

**प्र.५. केषाञ्चित् पञ्चानां वाक्यानां स्वभाषया अनुवादः कार्यः ।** **५**

(१) रामः भक्तान् धर्मे युनक्ति। (२) त्वं कथमित्थम् अनर्गलं प्रलपसि? (३) सीता वियोगे रामः विलापं चकार। (४) न्यायाधीशः स्तेनं दण्डयति। (५) विशाखदत्तः ''मुद्राराक्षस'' इति नाटकं रचितवान्। (६) शंकराचार्यः ''शांकरभाष्यम्'' इति ग्रन्थं रचितवान्।

**प्र.६. केषाञ्चित् पञ्चानां वाक्यानां संस्कृतभाषया अनुवादः कार्यः ।** **५**

(१) हिमालय में अनेक तपस्वी तप करते हैं। (२) प्रयत्नशील मनुष्य अवश्य सफलता प्राप्त करता है। (३) श्रद्धावान् मनुष्य ज्ञान प्राप्त करता है। (४) ध्वन्यालोक ग्रन्थ के रचयिता आनन्दवर्धन हैं। (५) भास ने तेरह संस्कृत-नाटकों की रचना की। (६) राम, लक्ष्मण और सीता ने पञ्चवटी प्रदेश में निवास किया।

(1) Many sages perform penance in the Himalayas. (2) A hard-working person definitely gets success. (3) A devoted man attains knowledge. (4) Anandavardhana is the author of Dhvanyalok.
(5) Bhasa composed thirteen plays in Sanskrit. (6) Rama, Lakshmana and Sita stayed at Panchavati.



❑ ❑ ❑

# भारतीय-विद्या-भवनम्, मुम्बई - ७

## ( सरल - संस्कृत - परीक्षा - विभागः )

# संस्कृत-कोविदः

## SAMSKRITA KOVIDA

### चतुर्थं प्रश्नपत्रम् - Fourth Paper

**( समयः २.०० तः ४.०० )** **( पूर्णाङ्काः ५० )**

**प्र.१. अधस्तनेषु केचन द्वयोः श्लोकयोः हिन्द्या/आंग्लभाषया/माध्यमभाषया व्याख्येयाः। १०**

(१) निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेच्छम्।
अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात्पथः प्रविचलन्ति पदं न धीराः।।

(२) दशदिगन्तजिता रघुणा यया श्रियमपुष्यदजेन ततः परम्।
तमधिगम्य तथैव पुनर्बभौ न न महीनमहीनपराक्रमम्।।

(३) राजा तु धर्मेण हि पालयित्वा महीपतिर्दण्डधरः प्रजानाम्।
अवाप्य कृत्स्नां वसुधां यथावद् इतच्युतः स्वर्गमुपैति विद्वान्।।

**प्र.२. अजविलापस्य अथवा भरतस्य चित्रकूटगमनस्य वर्णनं संस्कृतभाषायां कुरुत। १०**

**प्र.३. अधस्तनेषु द्वौ समाश्रित्य स्वभाषया निबन्धौ लेख्यौ । १०**

(१) कादम्बरी।
(२) अभिज्ञान-शाकुन्तलम् ।
(३) भासस्य नाट्यपरिचयः।

**प्र.४. अधस्तनेषु द्वयोः परिचयो देयः । १०**

(१) श्रीहर्षः।
(२) भारविः ।
(३) दण्डी ।

**प्र.५. अधस्तनस्य गद्यखण्डस्य स्वभाषयाऽनुवादः कार्यः ।** **१०**

कस्मिंश्चित् जलाशये त्रयः मत्स्याः निवसन्ति स्म। तेषु एकः अनागतविधाता नाम। सः अनापतितस्य व्यसनस्य परिहारं चिन्तयति। द्वितीयः प्रत्युत्पन्नमतिः नाम। सः आपतितस्य व्यसनस्य चातुर्येण प्रतिकारं करोति। तृतीयः यद्भविष्य नाम। सः आपतितेऽपि व्यसने ''यद् भवति तद्भवतु'' इति बुद्धया स्वस्थः तिष्ठति। त्रयः अप्येते मत्स्याः पुत्रकलत्रादिभिः परिवृताः मित्रैः संयुताः,सलिलेन धारिताः शैवलेन पोषिताः सूर्यातपेन दीप्ताः बहूनि वर्षाणि तं जलाशयं आश्रिताः निवसन्ति। दिवा च नक्तं च सततं स्नाताः, तीरात् स्वयं पतितानां क्षुद्रतृणानां भक्षणेन प्रीताः च ते प्रभूतं पुण्यम् अर्जयन्ति।

**अथवा**

यस्य स्वाध्यायप्रवचने प्रिये भवतः सः युक्तमनाः भवति, अपराधीनः सन् अहरहः अर्थान् साधयते, सुखं स्वपिति, परमचिकित्सक आत्मनो भवति। तस्य इन्द्रियसंयमः, एकाग्रता, प्रज्ञा-वृद्धिः, यशः लोकस्नेहश्चेति विशिष्टाः लाभा संपादिता भवन्ति। प्रज्ञा वर्धमानाः चतुरो लोकोत्तरान् विशेषान् ब्राह्मणमभिनिष्पादयति ब्राह्मण्यं, प्रतिरूपचर्यां, यशः लोकः स्नेहश्चेति। स्निग्धो लोकः चतुर्भिः विशेषाधिकारैः ब्राह्मणमभिनन्दति अर्चया, दानेन, यक्षवर्णेन अवध्यतया च। द्यावापृथिव्योरन्तरे ये के च श्रमाः स्वाध्यायाः तेषां परमा काष्ठा। यद्यपि छात्रः अभ्यक्तः, अलंकृतः, सुस्थितः, सुखे शयने शयानः स्वाध्यायमधीते स आनखाग्रेभ्यस्तपस्तप्यते। तस्मात्स्वाध्यायोऽध्येतव्यः।

❑ ❑ ❑